
# पञ्चमः पाठः । वीरवनिता विश्पला ।

ऋग्वेदात् उद्धृता अतीव अद्भुता रोमाञ्चकारिणी च एषा कथा स्त्रीणां सामर्थ्यं दर्शयति (ऋ.१.११६.१५)। शल्यक्रियाविशारदौ अश्विनीकुमारौ प्रगतवैद्यकतन्त्रज्ञानस्य मूलाधारौ स्तः । विश्पलायाः चरित्रं प्रेरणादायकं खलु सर्वेषां कृते ।– **सम्भाषणसन्देश–मासिकात्** ।



- का अन्या युद्धनिपुणा राज्ञी प्रसिद्धा ?
- कः युद्धप्रसङ्गः युष्माभिः सविस्तरं श्रुतः वा पठितः ?
- अपि श्रुताः आयुर्वेदस्य माहात्म्यविषयकाः कथाः ?
- के प्राचीनाः शल्यविशारदाः ?




खेलराजः नाम कश्चित् नृपः। विश्पला तस्य पत्नी। सा यथा महाविदुषी आसीत्, तथैव रणकुशला अपि आसीत्। खेलराजः अपि शूरः पराक्रमी च आसीत्। सः विश्पलया सह सुखेन जीवति स्म।

अथ कदाचित् शत्रवः खेलराजस्य राज्ये आक्रमणं **कृतवन्तः**। महत् युद्धम् आरब्धम्। सेनायाः नायकः खेलराजः रणरङ्गं **प्रविष्टवान्**। विश्पला अपि रणरङ्गं **प्रविष्टवती**। भुवम् अवतीर्णा चामुण्डेश्वरी इव सा शत्रूणां संहारं **कृतवती**। तस्याः शौर्यं पराक्रमं च दृष्ट्वा शत्रवः अपि चकिताः अभवन्।

'एषा रणरङ्गात् यावत् न निवार्यते तावत् जयः सर्वथा न प्राप्यते' इति चिन्तयित्वा शत्रुसैनिकाः युगपत् आक्रम्य ताम् **अवरुद्धवन्तः**। शत्रुसैनिकाः ते असङ्ख्याः आसन्, विश्पला तु एकाकिनी ! तथापि तस्याः मनसि न भीतिलेशः अपि आसीत् । प्रत्युत द्विगुणितेन उत्साहेन युद्धं **कृतवती**। युद्धसमये शत्रुसैनिकाः तस्याः एकं पादं **कर्तितवन्तः**। अनन्तरम् 'इतः परम् एतस्याः कारणात् पीडा न भविष्यति' इति निर्णयं कृत्वा ते शिबिरं **प्रतिगतवन्तः**।



यद्यपि विश्पलायाः पादः भग्नः तथापि सा हतोत्साहा न जाता। चैतन्यमूर्तिः सा वीराङ्गना एव आसीत्। 'श्वः मया युद्धं करणीयम् एव' इति निश्चित्य सा पादं पुनः प्राप्तुम् ऐच्छत्। अतः सा निश्चलतया उपविश्य अश्विनीकुमारयोः ध्यानं **कृतवती**। तस्याः



भक्ते : कारणात् अश्विनीकुमारौ लोहयुक्तं पादं योजयित्वा तां यथापूर्वं **कृतवन्तौ**। एतस्मात् विश्पला यथापूर्वं चलितुं युद्धं कर्तुं च समर्था जाता।

अनन्तरदिने प्रातः सा महता उत्साहेन रणरङ्गम् **आगतवती**। रणरङ्गे तां दृष्ट्वा एव शत्रुसैनिकाः चकिताः भीताः च। तस्याः दर्शनमात्रेण एव तेषां धैर्यं नष्टं जातम्। सा यदा आयुधप्रहारम् **आरब्धवती** तदा ते सर्वथा हतोत्साहाः जाताः। विश्पला शत्रून् कदलीवृक्षान् इव लीलया **कर्तितवती**। सहस्राधिकाः सैनिकाः तया संहताः।

एवं विश्पलायाः शौर्यस्य कारणतः तस्मिन् युद्धे खेलराजस्य एव जयः अभवत्।

वीरवनिता विश्पला भर्त्रा सह रणरङ्गं प्रविश्य शौर्येण युद्धं **कृतवती**। पादकर्तनानन्तरमपि अश्विनीकुमारयोः अनुग्रहेण पादं पुनः **प्राप्तवती** शत्रून् **संहृतवती** च। एतेन साहसेन सा वेदवाङ्मये बहुधा प्रशंसिता।

विश्पलायाः शौर्यं तथा च अश्विनीकुमारयोः शल्यक्रियाकौशलं स्मरन्तु इति अस्मान् उपदिशति इतिहासः।

## भाषाभ्यासः

### १. उचितं पर्यायं चित्वा रिक्तस्थानानि पूरयत।

अ) शत्रवः ____। (कृतवान्/कृतवन्तः)

आ) खेलराजः ____। (प्रविष्टवन्तः/प्रविष्टवान्)

इ) विश्पला ____। (प्रविष्टवान्/प्रविष्टवती)

ई) सा युद्धं ____। (कृतवान्/कृतवती)

उ) शत्रुसैनिकाः ____। (अवरुद्धवन्तौ/अवरुद्धवन्तः)

ऊ) सैनिकाः शिबिरं ____। (गतवन्तः/गतवन्तौ)

ए) शत्रुसैनिकाः पादं ____। (कर्तितवन्तः/कर्तितवन्तौ)

ऐ) सा रणाङ्गणम् ____। (आगतवत्यौ/आगतवती)

ओ) विश्पला ध्यानम् ____। (आरब्धवान्/आरब्धवती)

औ) अश्विनीकुमारौ तां यथापूर्वं ____। (कृतवन्तौ/कृतवत्यौ)

### २. स्तम्भमेलनं कुरुत।

| | | | | | |
|---|---|---|---|---|---|
| अ | १. लोहयुक्तम् | २. वीराङ्गना | ३. भीताः | ४. महत् | ५. शूरः |
| आ | १. युद्धम् | २. शत्रुसैनिकाः | ३. खेलराजः | ४. पादम् | ५. विश्पला |

### ३. अधोदत्तेषु विशेषणेषु यानि विशेषणानि विश्पलां न वर्णयन्ति तानि पृथुक्कुरुत।

चकिताः, अधीरा, प्रशंसिता, भीता, समर्था, निश्चला, एकाकिनी, चैतन्यमूर्तिः, अवरुद्धा, चामुण्डेश्वरी, महाविदुषी, रणकुशला, शूरः, नायिका, दुःखिता

### ४. माध्यमभाषया उत्तरं लिखत। 
१. विश्पलायाः शौर्यस्य वर्णनं कुरुत ।

२. विश्पला अश्विनीकुमारयोः ध्यानं किमर्थं कृतवती ?

पाठात् धातुसाधित-अव्ययानि चिनुत पृथक्कुरुत च।

५. समानार्थकशब्दं पाठात् लिखत। अरिः, चरणः, वीर्यम्, सङ्गरः, रणाङ्गणम्, रक्षकाः, पण्डिता, वीक्ष्य, वेदना, अगणिताः ।

६. विरुद्धार्थकशब्दं पाठात् लिखत। मित्रम्, कातरता, असमर्था, कातरः, पराजयः ।

**मौखिककार्यम्-अधोदत्तं कार्यं केन कृतम् इति लिखत।**

(अ) सेनायाः नायकत्वस्य स्वीकरणम्। (आ) राज्ये आक्रमणम्।
(इ) खेलराजस्य पश्चात् रणरङ्गं प्रवेशः। (ई) जयं प्राप्तुं युगपत् आक्रमणम्।
(उ) द्विगुणित-उत्साहेन युद्धम्। (ऊ) एकपादकर्तनम्।
(ए) शिबिरं प्रत्यागमनम् । (ऐ) विश्पलायाः दर्शनमात्रेण धैर्यनाशनम्।
(ओ) सहस्राधिकसैनिकानाम् संहरणम्। (औ) आयुधप्रहारेण उत्साहनाशनम्।

**(विसर्गस्य परिवर्तनं निरीक्षध्वम्।)** **पठत अवगच्छत !** **विश्वं विसर्गस्य !**

● अम्भोधिर्जलधिः पयोधिरुदधिर्वारान्निधिर्वारिधिः।

अम्भोधिः + जलधिः
पयोधिः + उदधिः
+ वारान्निधिः + वारिधिः। } **र्‌रूपः विसर्गः**

परोपकारः कर्तव्यः प्राणैरपि धनैरपि।

प्राणैरपि = प्राणैः + अपि।
धनैरपि = धनैः + अपि। } **र्‌रूपः विसर्गः**

● उत्तमा मध्यमा नीचास्तिस्रो वै प्राणिनां विधाः।
परार्थस्वार्थविध्वंसा लक्षणानि यथाक्रमम्।।

उत्तमाः + मध्यमाः
परार्थस्वार्थविध्वंसाः + लक्षणानि } **लोपी विसर्गः**

● मा मनो मधुपो मेघो मद्यपो मर्कटो मरुत्।
मक्षिका मत्कुणो मत्स्यो मकारा दश चञ्चलाः।।

मनः + मधुपः + मेघः + मद्यपः + मर्कटः + मरुत्।
मत्कुणः + मत्स्यः + मकाराः। **ओकाररूपः विसर्गः**
मकाराः + दश। **लोपी विसर्गः**

● स हि भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।।

दरिद्रः + यस्य
कः + दरिद्रः } **ओकाररूपः विसर्गः**

● हंसश्श्वेतः बकश्श्वेतः को भेदो बकहंसयोः।
नीरक्षीरविवेके तु हंसो हंसो बको बकः।।

| | | |
|---|---|---|
| हंसः | हंसश् | **श्‌रूपः विसर्गः** |
| बकः | बकश् | **श्‌रूपः विसर्गः** |
| कः | को | **ओकाररूपः विसर्गः** |
| भेदः | भेदो | **ओकाररूपः विसर्गः** |
| हंसः | हंसो | **ओकाररूपः विसर्गः** |
| बकः | बको | **ओकाररूपः विसर्गः** |

● त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वम् इन्द्रस्त्वम् अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवस्स्वरोम्।।

| | | |
|---|---|---|
| विष्णुः | विष्णुस् | **स्‌रूपः विसर्गः** |
| रुद्रः | रुद्रस् | **स्‌रूपः विसर्गः** |
| अग्निः | अग्निस् | **स्‌रूपः विसर्गः** |
| वायुः | वायुस् | **स्‌रूपः विसर्गः** |
| सूर्यः | सूर्यस् | **स्‌रूपः विसर्गः** |
| चन्द्रमाः | चन्द्रमास् | **स्‌रूपः विसर्गः** |

# रम्यसंस्कृतम्।    उपपदविभक्तय: (धातव:)।

१. गम् = (**द्वितीया**) पाण्डवा: **हस्तिनापुरम्** अगच्छन् ।
२. कुप् = (**चतुर्थी**) माता **शिशवे** कदापि न कुप्येत् ।
३. क्रुध् = (**चतुर्थी**) स्वामिनी **भृत्याय** क्रुध्यति ।
४. दा-यच्छ् = (**चतुर्थी**) शिष्या: **गुरवे** दक्षिणां यच्छन्तु ।
५. कथ् = (**चतुर्थी**) अप्सरसौ **देवेन्द्राय** वृत्तान्तम् अकथयताम् ।
६. रक्ष् = (**पञ्चमी**) कृष्ण: **सङ्कटात्/आपद:** गोपालान् रक्षति ।
७. वि + रम् = (**पञ्चमी**) त्वं **वृथाकलहात्** विरम ।
८. स्निह् = (**सप्तमी**) वयं **भ्रातृषु** स्निह्येम ।
९. रुच् = (**चतुर्थी**) **नरेन्द्राय** व्यायाम: रोचते ।
१०. स्पृह् = (**चतुर्थी**) गौरी **कुण्डलाय** स्पृहयति ।


**गणेशाय** मोदका: रोचन्ते।
गणेश: **मोदकेभ्य:** स्पृहयति।


**शिवाय** बिल्वपत्राणि रोचन्ते।
शिव: **बिल्वपत्रेभ्य:** स्पृहयति।


**महालक्ष्म्यै** कमलं रोचते।
महालक्ष्मी: **कमलाय** स्पृहयति।

एष: निखिल: । **निखिलाय** किं किं रोचते?


**निखिलाय**


लड्डुका: रोचन्ते ।



शाला रोचते ।


पुस्तकानि रोचन्ते ।


गणितसंस्कृते रोचेते ।

एषा काश्मीरा । काश्मीरा **कस्मै/कस्यै** स्पृहयति ?


काश्मीरा


**कण्ठहाराय** स्पृहयति।


**शशकाभ्यां** स्पृहयति।


**जलक्रीडायै** स्पृहयति।


**वेणवे** स्पृहयति।